# मंगलाष्टक

Mangalashtak — The Wedding Benediction Verses

## When these are recited

The mangalashtaks are recited at the muhurta, while the antarpat — a cloth screen — is held between the bride and groom so that neither sees the other. At the last verse the purohit calls शुभमंगल सावधान, the cloth is dropped, and the couple garland each other. The verses take a few minutes; families often lengthen the set with verses of their own composing.

स्वस्ति श्री गणनायकं गजमुखं मोरेश्वरं सिद्धिदम् ।
बल्लाळो मुरुडं विनायकमहं चिंतामणिं थेवरम् ॥
लेण्याद्रिं गिरिजात्मजं सुवरदं विघ्नेश्वरं ओझरम् ।
ग्रामे रांजण संस्थितो गणपतिः कुर्यात् सदा मंगलम् ॥१ ॥

गंगा सिंधु सरस्वती च यमुना गोदावरी नर्मदा ।
कावेरी शरयू महेंद्रतनया चर्मण्वती वेदिका ॥
क्षिप्रा वेत्रवती महासुरनदी ख्याता च या गंडकी ।
पूर्णाः पूर्णजलैः समुद्रसहिताः कुर्यात् सदा मंगलम् ॥२ ॥

लक्ष्मीः कौस्तुभ पारिजातक सुरा धन्वंतरिश्चंद्रमाः ।
गावः कामदुधाः सुरेश्वरगजो रंभादिदेवांगनाः ॥
अश्वः सप्तमुखो विषं हरिधनुः शंखोऽमृतं चांबुधेः ।
रत्नानीह चतुर्दश प्रतिदिनं कुर्यात् सदा मंगलम् ॥३ ॥

रामो राजमणिः सदा विजयते रामं रमेशं भजे ।
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः ॥
रामान्नास्ति परायणं परतरं रामस्य दासोऽस्म्यहम् ।
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥४ ॥

गौरी गौरगुणा गुणैकनिलया गंगाधरार्धांगिनी ।
या देवी सकलार्थसिद्धिजननी विद्या च विद्यालया ॥
सा नित्यं भवतां सुमंगलकरी विश्वंभरा शांकरी ।
कल्याणं कुरुतां सदा वरवधू कुर्यात् सदा मंगलम् ॥५ ॥

## शुभमंगल सावधान

After the last verse the purohit calls "शुभमंगल सावधान" — be attentive, for the auspicious moment has come. The antarpat is lowered and the couple garland each other. Many families follow this with the Ganpati aarti (सुखकर्ता दुखहर्ता).